# एकादशः पाठ

# रामभरतयोः मेलनम्



(ततः प्रविशति भरतः रथेन सुमन्त्रः सूतश्च)

भरतः- भोः तात!

सुमन्त्रः-कुमार! अयमस्मि।

भरतः- क्व तत्र भवान् मम आर्यः रामः?

सुमन्त्रः-कुमार एतस्मिन् एव आश्रमे रामः सीता लक्ष्मणश्च स्थिताः।

भरतः- भोः तात! निवेद्यतां निवेद्यताम्।

सुमन्त्रः-कुमार! किमिति निवेद्यते ?

भरतः- राज्यलुब्धायाः कैकेय्याः पुत्रः भरतः प्राप्तः इति।

रामः- सर्वथा न अयम् अबान्धवस्य स्वरसंयोगः क्लेदयतीव मे हृदयम्। वत्स लक्ष्मण! दृश्यतां तावत्!

लक्ष्मणः-यदाज्ञापयति आर्यः। (परिक्रामति) एहि एहि इक्ष्वाकु कुमार! स्वागतम्।

भरतः- अनुगृहीतोस्मि।

लक्ष्मणः- बाढम्। (उपेत्य) जयतु आर्यः।

अयं ते दयितो भ्राता भरतो भ्रातृवत्सलः।

संक्रान्तं यत्र ते रूपमादर्श इव तिष्ठति।।

सीता- आर्यपुत्र किं भरतः आगतः ?

रामः- सत्कृत्य शीघ्रं प्रवेश्यतां कुमारः।सीता स्वयं गच्छतु।

सीता- यदार्यपुत्र आज्ञापयति। (उत्थाय परिक्रामति)

भरतः- आर्ये! अभिवादये, भरतोहमस्मि।

सीता- चिरं जीव! एहि वत्स भ्रातृमनोरथं पूरय।

भरतः- (राममुपगम्य) आर्य! अभिवादये, भरतोहमस्मि।

रामः- (सहर्षम्) स्वस्ति आयुष्मान् भव! सुविपुलेन भुजद्वयेन माम् अलिङ्.ग।

भरतः- अनुगृहीतोस्मि। प्रसीदतु आर्यः।

सुमन्त्रः- अथेदानीम् अभिषेकोदकं क्व तिष्ठतु।

रामः- यत्र में मात्रोभिहितं , तत्रैव तावत् तिष्ठतु।

भरतः- हन्त! अनुत्तरमभिहितम्। परं तु मम हस्ते निक्षिप्तं तव राज्यं चतुर्दश वर्षान्ते प्रतिग्रहीतुमिच्छामि।

रामः- एवमस्तु।

भरतः- आर्य! अन्यमपि वरं इच्छामि।

रामः- वत्स! किम् इच्छसि ? किम् अहं ददामि ?

भरतः- पादोपभुक्ते एते तव पादुके मे प्रयच्छ।

रामः- तथास्तु। वत्स! गृह्यताम्।

## शब्दार्थः

**मेलनम्** - मिलन। **निवेद्यताम्** -सूचित किया जाय। **राज्यलुब्धायाः** - राज्य का लोभी। **स्वरसंयोगः** -आवाज का संयोग। **क्लेदयति** -आर्द्र या गीला करता है। **बाढम्त्र** -बहुत अच्छा। **उपेत्य** - आकर। **दयितः** प्रिय। **भ्रातृवत्सल** -भाई के प्रति स्नेह रखने वाला। **संक्रान्तम्** -प्रतिफलित या प्रतिबिम्बित। **रूपम्-** छवि/प्रतिबिम्ब। **आदर्शः** -दर्पण। **तिष्ठति** स्थित है। **अभिषेकोदकम्** -अभिषेक हेतु जल। **तिष्ठतु** - रखा जाय(डाला जाय)। **मात्रोभिहितम् -** माता के लिए। **प्रतिग्रहीतुम्** - स्वीकार करने हेतु। **पादोपभुक्ते** -पैरों में पहना हुआ। **पादुके** -दोनों खड़ाऊँ। **प्रयच्छ -** दे दीजिए।

**1-उच्चारणं कुरुत पुस्तिकायां च लिखत-**

राज्यलुब्धायाः क्लेदयतीव इक्ष्वाकुकुमारः

अनुगृहीतोस्मि अनुत्तरमभिहितम् चतुर्दशवर्षान्ते

**2. एकपदेन उत्तरत-**

(क) रामः सीता लक्ष्मणश्च कुतः स्थिताः आसन् ?

(ख) पितुः नियोगात् कः वनम् आगतः ?

(ग) अन्यमपि वरं कः इष्टवान् ?

(घ) पादोपभुक्तौ चरणपादुकौ कः अयाचत ?

**3. पूर्णवाक्येन उत्तरत-**

(क) भोः तात! निवेद्यतां निवेद्यतां कः उक्तावन् ?

(ख) भरतः कस्याः पुत्रः आसीत् ?

(ग) लक्ष्मणेन भरतस्य स्वागताय किम् अकथयत् ?

(घ) सीतायाः भरतं प्रति कः आशीषः आसीत् ?

**4. संस्कृतभाषायाम् अनुवादं कुरुत-**

(क) दूसरा वर भी प्राप्त करना चाहता हूँ।

(ख) राम सीता व लक्ष्मण इस आश्रम में रहते हंै।

(ग) भरत आ गये।

(घ) मैं अनुगृहीत हुआ।

**5. अधोलिखितवाक्येषु रेखांकितपदानि आधृत्य प्रश्ननिर्माणं कुरुत-**

(क) आश्रमे एव रामः सीता लक्ष्मणश्च स्थिताः।

(ख) एहि वत्स भ्रातृमनोरथं पूरय।

(ग) अन्यमपि वरम् इच्छामि।

(घ) तव पादुके प्रणताय मे प्रयच्छ।

**6. अधोलिखितपदेषु सन्धिं कृत्वा लिखत-**

(क) अयम्+अस्मि ..............................

(ख) सु+आगतम् .............................

(ग) अथ+इदानीम् .............................

(घ) अभिषेक+उदकम् .............................

**7-अधोलिखितानि पदानि प्रयुज्य वाक्यरचनां कुरुत-**

यथा- भरतः भरतः भ्रातृवत्सलः आसीत्।

(क) अनुगृहीत

(ख) स्वागतम्

(ग) वरम्

(घ) अन्यमपि

**शिक्षणसङ्.केत**

रामभरतयोः मेलनस्य कथां संक्षेपेण श्रावयत।